श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचितम्

# ॥ श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकम् ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

वेदानां मस्तके घुष्टं सत्यमित्येकमद्भुतम्।
सत्यव्रतपुरे दृष्टं लुनीतां शोकसन्ततिम् ॥ 1 ॥

शेषभोगं परित्यज्य श्रिया सह महीतले।
सत्यव्रतपुरे तिष्ठत् भातु मे वस्तु निस्तुलम् ॥ 2 ॥

जलजामण्डितं वक्षः जलजेनाङ्कितः करः।
जलेषु च दया यस्य भजे तं सत्यपूःप्रभुम् ॥ 3 ॥

भारतीवन्दितं देवं भावये वरदप्रभुम्।
भारवोढिति यो गीतो भवभीतिमतां सताम् ॥ 4 ॥

स्वर्धुनीसूतिकामीशशिरोभूषणमाद्रिये।
सत्यव्रतपुराधीशपदपद्मयुगं सदा ॥ 5 ॥

दुदूत च सुसूतेति भक्तानां वशगस्स्वयम्।
वर्ण्यते सत्यनाथोऽयं वन्दा इममतः प्रभुम् ॥ 6 ॥

अधमर्णधिया देव आहूतोऽपि भवेदसौ।
इति गीतगुणं नाथं ईडे सत्यपुरप्रभुम्॥ **7** ॥

श्रिया सह सदा जुष्टः भक्तानां क्लेशनाशनः।
सत्यव्रतपुराधीशः सौतु मे क्षेमसन्ततिम्॥ **8** ॥

धनुष्पुरीनाथकवीश्वरस्य सत्कृपाबलादेव कृपाकरश्शिशुः।
चकार सत्यव्रतदिग्गजं सतां मुकुन्दपादाब्जतृषावतां मुदे॥ **9** ॥

॥ इति श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकं समाप्तम्॥